This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र RM 390 विषय वैदिक.
नांव वा।सि१ठ ल१न पद्धती.
लेखक/लिपीकार —.
पृष्ठ 37.
काळ शके 1805 पूर्ण/अपूर्ण _____.

E

Checked 2014

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथवासिष्ठीहवनपद्धतिः प्रारभ्यते.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥ अथहवनपद्धतिः तत्रादौप्रतिज्ञा विष्णोर्विष्णो
र्विष्णोरद्योंनमःपरमात्मने श्रीपुराणपुरुषोत्तमाय अद्यश्रीब्रह्मणो
द्वितीयेपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वंतरे अष्टाविंशतिमे
युगे कलियुगे प्रथमचरणे जंबूद्विपे भरतखण्डे आर्य्यावर्त्तां-
तर्गतब्रह्मावर्तैकदेशे महाश्मशाने आनंदवने अभिमुक्तवारा-
णसीक्षेत्रे गौरीमुखे त्रिकंटकविराजिते बौद्धावतारे वर्तमानेयथा-
नामसंवत्सरे अमुकायने महामांगल्यप्रदे मासानांमासोत्तमेमास -
अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरान्वितायां अमुकरा-
शिस्थितेसूर्ये अमुकायने अमुकराशिस्थितेषु चंद्र भौम बुध गुरु शुक्र श

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निषुसत्सु शुभनामयोगे शुभकरणे एवंगुणविशेषणविशिष्टायां शुभपुण्य
तिथौ परमेश्वराज्ञारूपसकलशास्त्रश्रुतिस्मृतिपुराणोक्तफलप्राप्तिका
मः अमुकगोत्रोत्पन्नोहं अमुकशर्म्माहं आत्मनः सपुत्रबांधवस्य ग्रहकृत
राजकृतसर्वविधपीडानिवृत्तिपूर्वकनैरुज्यदीर्घायुःपुष्टिधनधान्यसमृद्धि-
कामः नवग्रहमखेनाहंयक्ष्ये इतिसंकल्पः अथावरणं० पटमंडपादिकरणं
तदभावेऽन्येनाच्छादनम् ततःस्वस्तिवाचनम् ॐ स्वस्तिनइंद्रो वृद्धश्रवास्व
स्तिनः पूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्योअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्ददातु
१पृषदश्वामरुतः पृश्निमातरः शुभंजजानोवितथेषु जग्मयः अग्निर्जिह्वामन-
वः सूरचक्षसेविश्वेनोदेवाअवसागमन्निह २ भद्रंकर्णेभिःशृणुयामदेवाभद्रंप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्येमाक्षभिर्यजत्राः स्थिरैरङ्गैःस्तुष्टुवा२सस्तनूभिव्यसेमहिदेवहितंयदायुः
३ शतमन्युशरदोअंतिदेवायत्रानश्चक्रा जरसंतनूनां पुत्रासोपितरोभवन्तिमा
नोमध्यारिरिषतायुर्गंतो ४ अदितिर्द्यौरदितिरंतरिक्षमदितिर्मातासपितासपु
त्रः अदितिःपंचजना अदितिर्जातमदितिर्जनित्वं ५ दिर्घायुत्वायबलायवर्चसे
सुप्रजायत्वायसहसा अथोजीवशरदः शतं ६ ॐ द्यौःशांतिरंतरिक्ष२ शांतिः
पृथिवीशांतिरोषधयः शांतिर्वनस्पतयः शांतिर्विश्वेदेवाः शांतिर्ब्रह्मशांतिःसर्व
ञ्ंशांतिः सामाशांतिरेधिः शांतिः सुशांतिभर्वतु ७ इतिस्वस्तिवाचनम्
श्रीगणेशायनमः॥ अथपुण्याहवाचनम् तत्रादौब्राह्मणकरे० आपःसं
तु० ब्राह्मणवचनं सौमनस्यमस्तु एवं अक्षताःपांतु मांगल्यमस्तु पुष्पा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णिपांतु श्रीरस्तु तांबूलानिपांतु ऐश्वर्यमस्तु दक्षिणाःपांतु आरोग्यमस्तु दी-
र्घायुः शांतिःपुष्टिःतुष्टिः श्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंबहुधनं चायुष्यंचा-
स्तु यंकृत्वासर्ववेदयज्ञक्रियाकरणारंभाः शोभनाःप्रवर्तंते तमहमोंकारमा
दिंकृत्वाऋग्यजुःसामाथर्वणाशीर्वचनंबहुऋषिमतंसमनुज्ञातं पुण्याहंवाचयि-
ष्ये इतिब्राह्मणवचनम् वाच्यतामितियजमानोब्रूयात् पुनः व्रतनियमतपः
स्वाध्यायक्रतुदमदानविशिष्टानांसर्वेषांब्राह्मणानांप्रतियजमानोब्रूयात् भोब्रा-
ह्मणाः मनःसमाधीयताम् ब्राह्मणाः समाहितमनसःस्मः यजमानोब्रूयात् म-
सीदन्तुभवंतः ब्राह्मणाः प्रसन्नाःस्मः ततोयजमानः अवनिक्तजानुमण्डलः
कमलमुकुलसदृशमं जलिंशिरस्याधाय दक्षिणेनपाणिनाजलपूर्णसुवर्णक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लशंधारयित्वा भूमौपात्रद्वयस्थापितेप्रथमपात्रेकिंचित्किंचिदुदकंपातयेत् त
त्रब्राह्मणावदेयुः ॐ शांतिरस्तुपुष्टिरस्तु वृद्धिरस्तु रिद्धिरस्तु अविघ्नमस्तु -
आयुष्यमस्तु आरोग्यमस्तु शिवमस्तु शिवंकर्मास्तु कर्मसमृद्धिरस्तु पुत्रसमृ
द्धिरस्तु वेदसमृद्धिरस्तु शास्त्रसमृद्धिरस्तु धनधान्यसमृद्धिरस्तु इष्टसंपदस्तु
अरिष्टनिरसनमस्तु यच्छ्रेयस्तदस्तु ततः द्वितीयपात्रेपातयेत् यत्पापमकल्या
णंतद्दूरेप्रतिहतमस्तु पुनः प्रथमपात्रेपातयेत् उत्तरोत्तरेकर्मण्यविघ्नमस्तु उत्त
रोत्तरमहरहर्वृद्धिरस्तु उत्तरोत्तराः क्रियाः शुभाः संपद्यंतां तिथिकरणमूहुर्तग्रहल
माधिदेवताः प्रीयंताम् तिथिकरणेमुमुहूर्तेसनक्षत्रेसग्रहेसदैवतेप्रीयेताम् अ-
ग्निपुरोगाविश्वेदेवाः प्रीयंताम् इन्द्रपुरोगामरुद्गणाः प्रीयंताम् वसिष्ठपुरोगाऋषि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गणाःप्रीयंतां ब्रह्मपुरोगाः सर्वेदेवगणाः प्रीयंतां विष्णुपुरोगाः सर्वेदेवाःप्री
यंतां ब्रह्मचब्राह्मणाश्चप्रीयंतां अम्बिकासरस्वत्यौप्रीयेतां श्रद्धामेधे
प्रीयेतां दुर्गापांचाल्यौप्रीयेतां भगवतीकात्यायनीप्रीयतां भगव
तीमाहेश्वरीप्रीयतां भगवतीवृद्धिकरीप्रीयतां भगवतीपुष्टिकरीप्रीयतां
भगवन्तौविघ्नविनायकौप्रीयेतां सर्वाःकुलदेवताःप्रीयंतां सर्वाग्रामदेवता
प्रीयंतां सर्वाःइष्टदेवताःप्रीयंतां पुनः द्वितीयपात्रेपातयेत् हताश्च
ब्रह्मद्विषः हताश्चपरिपंथिनः हताश्चविघ्नकर्तारः शत्रवःपराभवंयान्तु शाम्य
न्तुघोराणि शाम्यन्तुपापानि शाम्यन्त्वीतयः पुनः प्रथमपात्रेपातयेत् शुभानि
वर्द्धन्ताम् शिवाआपःसन्तु शिवाऋतवःसन्तु शिवाअमयःसन्तु शिवाआ-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हुतयःसन्तु शिवावनस्पतयःसंतु शिवाअतिथयःसन्तु अहोरात्रेशिवेस्याताम्
निकामेनिकामेनः पर्जन्योवर्षतु फलवत्योनः ओषधयः पच्यंताम् योगक्षेमोनः
कल्पताम् शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिताः आदित्यपुरो
गाःसर्वेग्रहाःप्रीयंताम् भगवान्नारायणःप्रीयताम् भगवान्पर्जन्यःप्रीयताम् भ
गवान्त्स्वामीमहासेनः प्रीयताम् पुरोनुवाक्यत्पुण्यंतदस्तु वषट्कारेणयत्पु-
ण्यंतदस्तु प्रातःसूर्योदयेयत्पुण्यंतदस्तु ततोयजमानः सुवर्णकलशंभू-
मौनिधाय प्रथमपात्रपातितजलेनशिरःसंमृज्य सपरिवारगृहं चाभिषेचये
त् द्वितीयपात्रपातितजलमेकांतेपातयेत् ब्राह्मणाःपुनरूचुः ब्रह्मपु-
ण्यमहर्यच्चसृष्ट्युत्पादनकारकं वेदवृक्षोद्भवंपुण्यंतत्पुण्याहंबुवंतुनः यजमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोब्रूयात् भोब्राह्मणाः ममसपरिवारस्यगृहेपुण्याहंभवंतोब्रुवंतु (ब्राह्मणाः) ॐ पुण्याहं ३ पुनंतुदेवजनाःपुनन्तुवसवोधियः पुनंतुविश्वाभूतानि जातवेदः पुनीहिमाम् (पुनःब्राह्मणाः) पृथिव्यामुद्धृतायान्तुयत्कल्याणंपुराकृतं ऋषिभिःसिद्धगंधर्वैरस्तत्कल्याणंबुवंतुनः (यजमानः) भोब्राह्मणाः ममसपरिवारस्यगृहेकल्याणंभवंतोब्रुवंतु (ब्राह्मणाः) कल्याणं ३ यथेमां वाचंकल्याणीमवदानिजनेभ्यः ब्रह्मराजन्याभ्या ५ शुद्रायाचार्य्यायचस्वियो देवानांदक्षिणायैदधातुरिह भूयासमयंमेकामः समृध्यताम् (ब्राह्मणाः) सागरस्यचयालक्ष्मीर्महालक्ष्म्यादिभिःकृता संपूर्णासुप्रभायाचतांचऋद्धिंब्रुवंतुनः (यजमानः) भोब्राह्मणाः ममसपरिवारस्यगृहेऋद्धिंभवंतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रुवंतु (ब्राह्मणाः) ॐ ऋध्यतां ३ संऋस्यऋङ्गिरस्यगमन ज्योतिरमृता अभू
मादिवंपृथिव्याऽऽरुहामविदामदेवाञ्ंसज्योतिः (पुनर्ब्राह्मणाः) स्व-
स्तिस्तुर्याऽविनाशारब्यानित्यंमंगलदायिनी विनायकप्रियानित्यंतांचस्वस्तिं
ब्रुवंतुनः (यजमानः) भोब्राह्मणाः ममसपरिवारस्यगृहेस्वस्तिर्भवंतो
ब्रुवतु (ब्राह्मणाः) ॐ स्वस्ति ३ स्वस्तिनइंद्रोवृद्धश्रवाः स्वस्तिनःपूषाविश्व
वेदाः स्वस्तिनस्तार्क्ष्योअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्ददातु ततोतिलका-
शिर्वादः (यजमानः) अस्ययागस्यनिष्पत्तौभवंतोऽभ्यर्चितामया सुप्र-
सादंप्रकुर्वंतु शांतिकंविधिपूर्वकं अत्रदक्षिणादानम् ॐ अद्यपुण्याहवाच
नसांगतासिद्ध्यर्थं पुण्याहवाचकेभ्योनानागोत्रेभ्योब्राह्मणेभ्यइमांयथाशा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्तिहिरण्यदक्षिणांसंप्रददे इतिपुण्याहवाचनम् ✓अथवरणम् पूर्वमाचा-
र्य्यंवृणुयात् पश्चात्सर्वेषांवरणम् तद्यथा आचार्य्यप्रतियजमानोब्रूयात्
अस्मिन्नासनेआस्यताम् आचार्य्योब्रूयात् आस्ये ततोयजमानः नमोस्त्व
नन्तायेतिमन्त्रेणपादप्र क्षालनंकुर्यात् नमोस्त्वनंतायसहस्रमूर्तयेसहस्रपा-
दाक्षिशिरोरुबाहवे सहस्रनाम्नेपुरुषायशाश्वतेसहस्रकोटीयुगधारिणेनमः
१ नमोब्रम्हण्यदेवायगोब्राम्हणहितायच जगद्धितायकृष्णाय गोविंदाय
नमोनमः २ गंधमाल्यपुष्पादिभिरभ्यर्च्य ॐ युञ्जन्तिब्रध्नमरुषंचरंतप
रिस्थुषः रोचंन्तेरोचनादिवियुज्जंत्यस्यकाम्याहरीविपक्षसारथे शोणा धृष्ण-
नृवाहसा १ ॐ अद्येत्यादिनवग्रहमखे होमकर्मकर्तुमभिश्चंदनतांबूल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुण्डलांगुलीयककमंडलुवासोभिराचार्य्यत्वेन अमुकगोत्रं अमुकशर्माणं अमु-
कवेदाध्यायिनंत्वामहं वृणे॰ आचार्य्योवृतोस्मि इतिप्रतिवचंदद्यात् ॐ
व्रतेनदीक्षामाप्नोतिदक्षिणाः दक्षिणयाश्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते इत्य
नेनमंत्रेणकुशस्थैर्जलबिन्दुभिर्यजमानमभिषिंचेत् अथाचार्यप्रार्थना आ
चार्यस्तुयथास्वर्गेशक्रादीनांबृहस्पतिः तथात्वंममयज्ञेस्मिन्नाचार्योभवसुव्र-
त१ अथब्रह्मवरणम् ब्रह्माणंप्रतियजमानोब्रूयात् अस्मिन्नासनेआस्यताम्
(ब्राह्मणः)आस्येततोयजमानः नमोस्त्वनंतायेतिमंत्रेणपादप्रक्षालनंकुर्य्यात्
गंधपुष्पमाल्यादिभिरभ्यर्च्य ॐ अद्येत्यादिनवग्रहमखहोमकर्मणिन्यूना-
धिकसंरक्षणार्थमेभिश्चंदनतांबूलकुंडलांगुलीयककमंडलुवासोभिर्ब्रह्म-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लेनामुकगोत्रंअमुकशर्माणंअमुकवेदाध्यायिनंत्वामहंवृणे (ब्राम्हणः) वृ
तोस्मि इतिप्रतिवचनं यथाचतुर्मुखोब्रम्हासर्ववेदधरःप्रभुः तथात्वंमम
यज्ञेस्मिन्ब्रह्माभवद्विजोत्तम १ ॐ व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणां
दक्षिणयाश्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते इत्यनेनमंत्रेणकुशस्थैर्जलबिन्दु-
भिर्यजमानमभिषिंचेत् अथऋत्विग्वरणम् ऋत्विजंप्रतियजमानोब्रूया-
त् इदमासनमास्यताम् (ऋत्विक्) आस्ये ततोयजमानः नमोस्त्वनंताये-
तिमंत्रेणपादप्राक्षालनंकुर्य्यात् गंधपुष्पमाल्यादिभिरभ्यर्च्च ॐ अद्येत्या-
दिनवग्रहमखवह्नोमकर्माणिहवनंकर्त्तुमोभिश्चंदनतांबूलकुण्डलांगुलीयककमं-
डलुवासोभिः ऋत्विक्त्केन अमुकगोत्रं अमुकशर्माणं अमुकवेदाध्यायिनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वामहंवृणे ऋत्विक् वृतोस्मि इतिप्रतिवचनं ऋग्वेदःपद्मपत्राक्षो-
गायत्रःसोमदैवतः अत्रिगोत्रस्तुविप्रेंद्रऋत्विक्कंमेमखेभव १ ॐ य-
तेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणां दक्षिणयाश्रद्धामाप्नोति श्रद्धयास-
त्यमाप्यते इत्यनेनमंत्रेणकुशस्थैर्जलबिन्दुभिर्यजमानमभिषिंचेत् एवंअ
ध्वर्युं होतारंसदस्यंउपदेष्टारंचवृणुयात् अथसर्वेषांप्रार्थना त्वंगुरु-
श्चपितामातात्वंप्रभुस्त्वंपरायणं त्वत्प्रसादाच्चविप्रर्षेसर्वमेस्यान्मनोगतं १
आपद्विमोक्षणार्थायकुरुयज्ञमतंद्रितः ऋत्विग्भिः सहितैः शुक्लैः
संयुतैः सुसमाहितैः आचार्येणचसंयुक्तःकुरुकर्मयथोदित भगवन्सर्व
धर्मज्ञसर्वधर्मभृतांवर वित्तेममयज्ञेस्मिन्नुपद्रष्टाभवद्विज २ अथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रक्षाभिधानं तत्रादौ श्वेतसर्षपतंदुलपूर्णपुटकमादायरक्षासूत्रंसफल-
दक्षिणाकंगृहीत्वामंत्रान्पठित्वासर्षपाक्षतैर्दिक्करक्षांकुर्यात् ॐ पूर्वेरक्ष-
तुवाराहआग्नेय्यांगरुडध्वजः दक्षिणेपद्मनाभस्तु नैर्ऋत्यांमधुसूदनः प-
श्चिमेचैवगोविंदो वायव्यांतुजनार्दनः उत्तरेश्रीपतीरक्षेत् ईशान्यांहिमहेश्व-
रः ऊर्ध्वंरक्षतुधातावा ह्यधोऽनंतश्चरक्षतु अनुक्तमपियत्स्थानंरक्षत्वीशो
ममाद्रिधृक् रक्षासूत्रं ॐ येनबद्धोबलीराजादानवेंद्रोमहाबलः तेनत्वां
प्रतिबध्नामिरक्षेमाचलमाचल यजमानगात्रप्रमाणं अन्येषांप्रमाणंनइ-
ति आचार्यादिवरणं अथकलशस्थापनम् ॐ भूरसिभूमिरस्यदितिरसि
विश्वधाविश्वस्यभुवनस्यधर्त्रीपृथिवींयच्छपृथिवींद्रꣳरुपृथिवींमाहिꣳसीः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिमंत्रेणगंधादिभिः पृथ्वीमभिपूज्यहस्तेनस्पर्शंकुर्यात् ॐ मानस्तोके तनये
मानआयुषिमानोगोषुमानोअश्वेषुरीरिषः वीरान्मानोरुद्रभामितोव धीर्हविः-
ष्मन्तःसदमित्वाहवामहे इतिमंत्रेणकलशेगोमयस्पर्शंकुर्यात् ॐ आ-
जिघ्रंकलशंमह्यात्वाविशंत्विंदवः पुनरुर्ज्जानिवर्तस्वसानः सहस्रंधुक्ष्वोरुधा
रापयस्वतीपुनर्माविशताद्रपि इतिमंत्रेणकलशस्पर्शंकुर्यात् ॐ वरुण
स्योत्तंभनमसिवरुणस्यस्कम्भसर्जनीस्थोवरुणस्यऋतसदन्यसिवरुणस्य
ऋतसदनमसिवरुणस्यऋतसदनमसिद इतिमंत्रेणकलशेजलंदद्यात् ॐ
ॐ पवित्रस्थोवैस्नव्यौसवितुर्वः प्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्यरश्मि
भिः इतिमंत्रेणकलशेपवित्रंदद्यात् ॐ अम्बेअम्बिकेम्बालिकेनमा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नयतिकश्चनससस्त्यश्वकः सुभद्रिकांकांपीलवासिनीम् इतिमंत्रेणकल- क.
शेपंचपल्लवंदद्यात् ॐ धान्यमसिधिनुहिदेवान् प्राणायत्वोदानायत्वाव्या
नायत्वादीर्घामनुप्रसितिमायुषेधांदेवोवः सविताहिरण्यपाणिः प्रतिगृभ्णात्व
च्छिद्रेणपाणिनाचक्षुषेत्वामह्नीनांपयोसि इतिमंत्रेणकलशेधान्यंदद्यात्
ॐ प्राणायस्वाहाऽपानायस्वाहाव्यानायस्वाहा इतिमंत्रेणकलशेताम्बूलंद
द्यात् ॐ याःफलिनीर्य्याअफलाअपुष्पायाश्चपुष्पिणीः बृहस्पतिप्रसूतास्ता
नोमुंचंत्वꣳहसः इतिमंत्रेणकलशेपूगीफलंनारिकेलंवादद्यात् ॐ हिरण्य ८
गर्भःसमवर्त्तताग्रेभूतस्यजातः पतिरेकआसीत् सदाधारपृथिवींद्यासुतेमांक
स्मैदेवायहविषाविधेम इतिमंत्रेणकलशेहिरण्यम् अन्यद्द्रव्यंवादद्यात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहा सूर्यो ज्योतिर्ज्योतिःसूर्य्यः स्वाहा अग्निर्वर्चो ज्योतिर्वर्चःस्वाहा सूर्य्यावर्चो ज्योति र्वर्चःस्वाहा ज्योतिःसूर्य्यःसूर्य्यो ज्योतिःस्वाहा इतिमंत्रेणकलशासमीपेपूर्वदिशि एकस्मिन्यावेदीपंनिदध्यात् इतिकलशास्वरूपम् अथकलशाधिष्ठातृदेवतानामावाहनम् ॐ सरितःसागराश्शैलास्तीर्थानिजलदानदाः आयान्तुयजमानस्यदुरितक्षयकारकाः इतिमंत्रेणकलशेगंधाक्षतपातः कलशस्यमुखेविष्णुः कंठेरुद्रःसमाश्रितः मूलेस्तस्यस्थितोब्रम्हामध्येमातृगणःस्मृतः कुक्षौतुसागरास्सप्तसप्तद्वीपावसुंधरा ऋग्वेदोथयजुर्वेदः सामवेदोह्यथर्वणः अंगैश्चसहितास्सर्वेकलशंतुसमाश्रिताः इत्यावाह्याभिपूजनंकुर्यात् तत्रादौसंकल्पः महामांगल्यपदे-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मासोत्तमेवासुकमासिअमुकपक्षेचासुकतिथौ अमुकगोत्रस्याऽमुकशर्मणः
सपरिवारस्यनिखिलकामनावाप्त्यर्थंकर्त्तव्यंअमुकतृप्तिजनकाऽमुककर्मकर्त्तुं
कलशाधिष्ठातृदेवतानांपूजनमहंकरिष्ये इतिसंकल्प्य ॐ कलशाधिष्ठातृ-
देवताभ्योनमः इतिमंत्रेणगंधादिभिःसंपूज्यपुष्पांजलिंनिवेद्यनतिंकुर्य्यात्
अथकलशप्रार्थना देवदानवसंवादे मथ्यमानेमहोदधौ उत्पन्नोसियदाकुंभ
विधृतोविष्णुनास्वयम् त्वत्तोयेसर्वतीर्थानि देवाःसर्वेत्वयिस्थिताः ✓ त्वयितिष्ठं-
तिभूतानित्वयिप्राणाः प्रतिष्ठिताः शिवस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः
आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः त्वयितिष्ठंतिसर्वेपियतःकामफलप्र
दाः ✓ त्वत्प्रसादादिमंयज्ञंकर्त्तुमीहेजलोद्भव संनिध्यंकुरुमेदेव प्रसन्नोभव-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वदा इतिकलशस्थापनम् अथकलशाग्रेपश्चिमदिशिगणेशाम्बिकयोः पूज
नम् तत्रादौहस्तेगंधाक्षतपुष्पाणिगृहीत्वागणेशावाहनंकुर्यात् ॐ एह्ये
हिहेरम्बमहेशपुत्रसमस्तविघ्नौघविनाशदक्ष मांगल्यपूजाप्रथमप्रधानगृहाण
पूजांभगवन्नमस्ते ॐ गणानांत्वागणपति२ हवामहेप्रियाणांत्वाप्रियपति२
हवामहेनिधीनांत्वानिधिपति२ हवामहेवसोमम आहमजानिगर्भधमात्वमजा-
सिगर्भधम् आगच्छभगवन्देवस्वस्थानात्परमेश्वर अहंपूजांकरिष्यामिसदा
त्वंसंमुखोभव १ इत्यावाह्यपूजयेत् एतत्पाद्यंगणपतयेनमः एषोर्घोग
णपतयेनमः एतत्स्नानीयंजलंगणपतयेनमः इदंगंधंगणपतयेनमः इमेअ-
क्षताः गणपतयेनमः इदंपुष्पमाल्यंचगणपतयेनमः इमेवस्त्रयज्ञोपवीतेगणप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयेनमः ॐ धूरसिधूर्वधूर्वंतंधूर्वतंयोस्मान्धूर्वतितंधूर्वजंवयंधूर्वामः देवाना
मसिवन्हितमꣳ सस्नितमंपप्रितमंजुष्टतमंदेवहूतमं इतिमंत्रेणधूपंगणपतये
नमः ॐ अग्निर्ज्योतिरितिमंत्रेणदीपंगणपतयेनमः नैवेद्यंगणपतयेनमः आ-
चमनीयंगणपतयेनमः तांबूलंगणपतयेनमः फलंदक्षिणांचगणपतयेनमः
अथविशेषार्घ्यः रक्षरक्षगणाध्यक्षरक्षत्रैलोक्यरक्षक भक्तानामभयंकर्त्ता-
त्राताभवभवार्णवात् १ द्वैमातुरकृपासिंधोषाणमातुराग्रजप्रभो वरदस्त्वंव
रंदेहिवांछितंवांछितार्थद २ गृहाणार्घमिमंदेवसर्वदेवनमस्कृतं अनेनफ-
लदानेनफलदोस्तुसदाममꣳ ३ इतिविशेषार्घः अथपुष्पांजलिं मालतीम
ल्लिकाजाती शतपत्रादिसंयुतं पुष्पांजलिंगृहाणेशतवपादयुगार्पितं पुष्पां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जलिंनिवेद्य ॐ एतान्यर्च्चनानिपाद्यार्घस्नानवस्त्रयज्ञोपवीतगंधाक्षतपुष्पधू
पदीपनैवेद्याचमनीयताम्बूलफलदक्षिणापुष्पांजल्यं तानिपरिपूर्णानि भवंतु-
अनेनपूजनेनगणपतिःप्रीयताम् ✓ अथप्रार्थना विघ्नेश्वरायवरदायसुरप्रि
यायलंबोदरायसकलायजगद्धितायनागाननायश्रुतियज्ञविभूषितायगौरीसु
तायगणनाथनमोनमस्ते १ इतिप्रार्थना अथगौरीपूजनं ॐ श्रीश्च-
तेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तं इष्णंनिषाणामुम्म
ईषाणसर्वलोकमयीषाण १ सर्वमंगलमांगल्येशिवेसर्वार्थसाधिके शरण्ये-
त्र्यंबकेगौरिनारायणिनमोस्तुते २ ॐ गौर्य्यैनमः इत्यनेनपाद्यादिभिः संपूज्य
कुंकुमंकामनादिव्यं कामनाकामसंभवं कुंकुमेनार्चितेदेवि गृहाणपरमेश्व-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रि १ हरिद्रानिर्मितंदेविसौभाग्यंसुरवसंपदः अतस्त्वांपूजयिष्यामिगृ
हाणपरमेश्वरि २ अबीरंचगुलालंचचोवाचंदनमेवच अबीरेणार्चितादेवि अ-
तःशांतिंप्रयच्छमे ३ सिंदूरंशोभनंरक्तंसौभाग्यंप्रियवर्द्धनं सुरवदंमोक्षदंचै-
वसिंदूरंप्रतिगृह्यतां ४ अक्षताश्चसुरश्रेष्ठकुंकुमाक्ताःसुशोभिताः मयानिवेदि-
ताभक्त्यागृहाणपरमेश्वरि ५ √माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो म-
याहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यतां ६ वनस्पतिरसोत्पन्नःसुगंधाढ्योमनो
हरः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां ७ साज्यंचवर्तिसंयुक्तंवह्निनायो-
जितंमया दीपंगृहाणदेवेशित्रैलोक्यतिमिरापहं ८ शर्करारवंडुरवाद्यानिद-
धिक्षीरघृतानिच आहारंभक्ष्यभोज्यंचनैवेद्यंप्रतिगृह्यतां ९ गंगाजलंसमानी-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंसुवर्णकलशोद्धृतं आचमनीयंदेवेशिप्रीत्यर्थंप्रतिगृह्यतां १० इदफलंमया
देविस्थापितंपुरतस्तव तेनमेसुफलावाप्तिर्भवेज्जन्मनिजन्मनि ११ हिरण्य
गर्भगर्भस्थंहेमबीजंविभावसोः अनंतपुण्यफलदमतःशांतिंप्रयच्छमे १२
यानिकानिचपापानिजन्मांतरकृतानिच तानितानिविनश्यंतिप्रदक्षिणपदेप-
दे १३ पुष्पांजलिंनिवेद्यनतिंकुर्यात् इतिसंक्षेपतःगौरीपूजनं अथग्रहा
णांस्थापनंपूजनंच तद्यथा रक्तपुष्पाक्षतान् गृहीत्वाआवाहयेत् सप्त
म्यांविशारवान्वितायांकलिंगजातंकश्यपगोत्रंलोहितवर्णंवर्तुलाकृतिंमंडल
मध्यस्थंद्विभुजंपद्महस्तंसप्ताश्वरथवाहनंक्षत्रियाधिपतिंईश्वरदैवतं अग्नि-
प्रत्यधिदैवतसहितंसूर्य्यंआवाहयामि० ॐ भूर्भुवःस्वः भगवन् सूर्य एहागच्छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इहतिष्ठइमंयज्ञमभिरक्ष० इत्यावाह्य ॐ आकृष्णेनरजसावर्तमानोनिवेश
न्नमृतंमर्त्यंच हिरण्येनसवितारथेनदेवोयातिभुवनानिपश्यन् ० पद्मासनः
पद्मकरःपद्मगर्भसमद्युतिः सप्ताश्वः सप्तरज्जुश्चद्विभुजःस्यात्सदारविः १
इतिमंत्रेणपाद्यादिभिः सूर्य्यंसंपूज्यानेनैवमंत्रेणरक्तपताकादानम् इतिसूर्य्य
पूजनं अथचंद्रावाहनं श्वेतपुष्पाक्षतान्गृहीत्वावाहयेत् ॐ चतुरश्रांकृ-
त्तिकान्वितायांसमुद्रजातं अत्रिगोत्रंश्वेतवर्णं अर्द्धचन्द्राकृतिं मंडलात्पूर्वद-
क्षिणदिक्स्थंदक्षिणाभिमुखंदशाश्वरथवाहनंविशांपतिं उमाधिदैवतं जलमत्य-
धिदैवतंसहितंचंद्रमावाहयामि० ॐ भूर्भुवःस्वः चंद्रेहागच्छ इहतिष्ठ इमंय-
ज्ञमभिरक्ष० इत्यावाह्य० ॐ इमंदेवतिमंत्रेणपाद्यादिभिःचंद्रंसपूज्यानेनैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंत्रेणश्वेतपताकादानं इतिचंद्रपूजनं ✓अथभौमावाहनं ✓ रक्तपुष्पाक्षता-
न्गृहीत्वाआवाहयेत् दशम्यांपूर्वाषाढान्वितायांअयोध्याजातंभारद्वाजगोत्रं
रक्तवर्णंत्रिकोणंमंडलोद्दक्षिणदिग्विभागस्थंपश्चिमाभिमुखंमेषवाहनंक्षत्रिया
धिपतिंस्कंदाधिदैवतंक्षितिप्रत्यधिदैवतसहितंभौममावाहयामि॰ॐ भूर्भु
वःस्वः भौमइहागच्छइहतिष्ठइमंयज्ञमभिरक्ष॰ इत्यावाह्य ॐ अग्निर्मू-
र्द्धेतिमंत्रेणपाद्यादिभिः भौमंसंपूज्य ✓अनेनैवमंत्रेणरक्तपताकादानं इति
भौमपूजनंम् ✓अथबुधावाहनं ✓ हरित्पुष्पाक्षतान्गृहीत्वा आवाहयेत् द्वाद-
श्यांधनिष्ठान्वितायांमगधदेशजातं अत्रिगोत्रंहरिद्वर्णंकार्मुकाकृतिंमंडलात्पूर्वो
त्तरस्थंउत्तराभिमुखंशूद्राधिपतिंसिंहवाहनंनारायणाधिदैवतंविष्णुप्रत्यधिदैव-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तसहितंबुधमावाहयामि ॐ भूर्भुवःस्वः बुधइहागछ इहतिष्ठ इमंयज्ञमभिर
क्ष० इत्यावाह्य ॐ उद्बुध्यस्वाग्नेतिमंत्रेणपाद्यादिभिर्बुधंसंपूज्य अनेनैवमंत्रे
णहरित्पताकादानं इतिबुधपूजनं अथगुर्वावाहनं पीतपुष्पाक्ष-
तान्गृहीत्वाआवाहयेत् एकादश्यांउत्तराफाल्गुनीयुतायांसिंधुदेशजातं आ-
गिरसगोत्रंगोरोचनाभंपद्माकृतिमंडलादुत्तरस्थितंसिंहवाहनंब्रह्माधिदैवतंइं-
द्रप्रत्यधिदैवतसहितंगुरुमावाहयामि ॐ भूर्भुवःस्वः गुरोइहागच्छ इहति
ष्ठ इमंयज्ञमभिरक्ष० इत्यावाह्य ॐ बृहस्पतेइतिमंत्रेणपाद्यादिभिःगु
रुंसंपूज्य अनेनैवमंत्रेणपीतपताकादानम् इतिगुरुपूजनं अथशुक्रावा
हनं श्वेतपुष्पाक्षतान्गृहीत्वाआवाहयेत् नवम्यांपुष्ययुतायांभोजकटजा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं भार्गवगोत्रं शुक्लवर्णंचतुष्कोणंमंडलात्पूर्वदिक्स्थंपूर्वाभिमुखंमण्डूकवाहनं
इन्द्राधिदैवतंइंद्राणीप्रत्यधिदैवतसहितंशुक्रं आवाहयामि ॐ भूर्भुवःस्वःशुक्र
इहागच्छ इहतिष्ठ इमंयज्ञमभिरक्ष ॐ अन्नात्परितिमंत्रेणपाद्यादिभिः शुक्रंसपू
ज्य अनेनैवमंत्रेण श्वेतपताकादानम् इतिशुक्रपूजनम् अथशान्या वाहनम्
बिल्वपत्राक्षतान्गृहीत्वा आवाहयेत् अष्टम्यांरेवतीयुतायांसौराष्ट्र जातंकाश्य
पगोत्रंलोहवर्णंपुरुषाकृतिंमंडलात्पश्चिमस्थंदक्षिणाभिमुखंगृधवाहनंसंक
रजातियमाधिदैवतंजलप्रत्यधिदैवतसहितंशनिमावाहयामि ॐ भूर्भुवःस्वः
शनेइहागच्छ इहतिष्ठ इमंयज्ञमभिरक्ष ॐ शन्नोदेवीतीमंत्रेणपाद्यादिभिः श-
निंसंपूज्य अनेनैवमंत्रेणकृष्णपताकादानं इतिशनिपूजनम् अथराहोरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाहनं कृष्णपुष्पाक्षतान्गृहीत्वाआवाहयेत् पौर्णमास्यांभरणीयुतायांम
गधजातंपैठीनसीगोत्रंकृष्णवर्णमकराकृतिंमंडलात्पश्चिमदक्षिणदिक्स्थंप-
श्चिमाभिमुखंशूद्राधिपतिंसिंहवाहनंकालाधिदैवतंसर्पप्रत्यधिदैवतसहितंरा-
हुमावाहयामि ॐ भूर्भुवःस्वः राहोइहागच्छ इहतिष्ठइमंयज्ञमभिर-
क्षस्व ॐ कयानश्चित्रेतिमंत्रेणपाद्यादिभिःराहुंसपूज्यानेनैवमंत्रेणकृष्णप
ताकादानं इतिराहुपूजनम् अथकेत्वावाहनम् कृष्णपुष्पाक्षतान्गृही-
त्वा आवाहयेत् अमावास्यायांआश्लेषान्वितायांपर्वतजातंजैमिनिगोत्रंधू-
म्रवर्णंरथाकृतिंकपोतवाहनं अंत्यजाधिपतिंमंडलात्पश्चिमोत्तरस्थंपश्चि-
माभिमुखंचित्रगुप्ताधिदैवतंब्रम्हप्रत्यधिदैवतसहितंकेतुमावाहयामि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ भूर्भुवःस्वः केतोइहागच्छ इहतिष्ठइमंयज्ञमभिरक्ष० ॐ केतुंकृण्वन्नेति
मंत्रेणपाद्यादिभिः केतुंसपूज्यअनेनैवमंत्रेणधूम्रपताकादानं इतिकेत्वं
तनवग्रहाणांसंपूजनं अथानंतरगणेशकलशयोरीशानभागेयक्षेश्वरकल
शस्थापनं० तद्यथा अश्वत्थगोरमृत्तिकापंचरत्नसर्वौषधिफलद्रव्य
वस्त्रा म्रपल्लवसंयुतंकलशमैशान्यांस्थापयेत् तत्रपठनीयोमंत्रः ॐ
सूर्य्यायत्वायुषंनिर्वापयामि० ॐ चंद्रायुत्वायुषंनिर्वपामि० अनेनैवमंत्रेण
कलशमध्येपूर्वद्रव्याक्षतगंधपुष्पांतप्रक्षेपः अनेनैवकलशजलेनयज्ञांतेय-
जमानमभिषिंचेत् इतिसंक्षेपतःपूजनविधिः अथसर्वतोभद्रमंड-
लदेवताः अथपुराणोक्तमंडलदेवतालिख्यंते त्वंवैचतुर्मुखोब्रह्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यलोकेपितामह आगच्छमंडलेचास्मिन्ममसर्वार्थसिद्धये मध्येब्रह्मा
णं १ क्षीरोदार्णवसंभूतलक्ष्मीबंधोनिशाकर मंडलेस्थापयाम्यत्रसोमं-
सर्वार्थसिद्धये उत्तरेसोमं २ ईशानपावकश्रेष्ठ सर्वलोकभयंकर मंडले
स्थापयामीह इशानंसर्वसिद्धये ईशान्यांईशानं ३ सर्वलोकाधिकंश्रेष्ठदे-
वर्षीणांचपालकं पूर्वदिक्पालकंदेवराजानांस्थापयाम्यहं पू० इंद्रं ४
त्रिपादंमेषवाहंचत्रिशिरंचत्रिलोचनं आग्नेय्यांस्थापयाम्यत्र अग्निपूरुषमुत्तमं
५ अंतकःसर्वलोकानांधर्मराज इतिश्रुतः अतस्त्वांस्थापयाम्यत्र द-
क्षिणस्यांस्थिरोभव ६ नैर्ऋत्यांवसतिर्यस्यघोररूपीसदाहियः निर्ऋतिं
स्थापयाम्यत्रनैर्ऋत्यांमंडलेशुभे ७ अपांपतिंपाशधरंयादसांप्रनिकंशुभं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वरुणंस्थापयाम्यत्रवारुण्यांमंडलेशुभे ८ आशुगंस्पर्शबोधंचगंधवा-
हंसुशीतलं मंडलेस्थापयामीहवायव्यांवायुमुत्तमं ९ धरोध्रुवश्चसोम
श्च आशुगश्चनलोनलः प्रत्यूषश्चप्रभासश्चवस्वष्टकमिहस्थिरं वायुसोम
योमध्येवसून् १० त्रिनेत्रायत्रिरूपायत्रिजटायमहात्मने नमस्कृत्वास्था
पयामिमंडलोपरिमध्यतः सोमेशानयोमध्येरुद्रान् ११ आदित्यं
भास्करंचैवप्रभाकरदिवाकरौ सूर्यं गृहपतिंसोमंत्रभंतेजोहरिद्धरिं सप्ता
श्वंवेदमूर्तिंचत्रिदैवत्यंक्रमेणच इत्यादिद्वादशादित्यान्मंडलेस्थापयाम्य-
हं ईशानेंद्रयोर्मध्येद्वादशादित्यान् १२ अश्विनौदेववैद्यौच सर्गस्थि
त्यंतकारकौ मंडलेस्थापयित्वातु पूजयामिस्वसिद्धये इंद्राग्न्ययोर्म-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्येअश्विनौ १३ दैवेकर्मणिपित्र्येचयौमुख्यौसर्वदाशुभौ मंडलेस्थापया मीहस्करवानुष्ठानसिद्धये अग्नियमयोर्मध्येविश्वान्देवान् १४ यद्दच्छयापर्यटंतेयक्षराजामहीतले कौतुकंप्रेक्षितुंचास्मिन्मंडलेसंतुसुस्थिराः यमनिर्ऋतिमध्येयक्षान् १५ अनंतोवासुकिश्चैवकालीयोमणिभद्रकः शंखश्चशंखपाकश्चकर्कोटकधनंजयौ धृतराष्ट्रश्चनागेशाःप्रगृह्णंतुममार्चनं निर्ऋतिवरुणयोर्मध्येनागान् १६ उर्वशीप्रमुखाःसर्वाः स्वर्वेश्याःशक्रपूजिताः गंधर्वैश्चसहायांतुमंडलेस्मिन्सुशोभनाः वरुणवाय्वोर्मध्येगंधर्वाप्सरसः १७ त्रियंबकंत्रिपुरुषंनीलकंठंसदाशिवं- मंडलेस्थापयामीहस्करवानुष्ठानसिद्धये ब्रह्मसोमयोर्मध्येरुद्रं १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षडाननंचतुर्हस्तंस्कंदंगौरीसुतंशुभं इहैवपूजयिष्यामिसर्वकामार्थसिद्धये
रुद्रसोमयोर्मध्येस्कंद १९ शिवद्वारगतस्त्वंचशिववाहनमुत्तम पार्वत्याः
प्रीतिकृन्नित्यमिहागच्छस्थिरोभव तत्रैवनंदिं शूलमहाकालौच २० अदि
तिर्देवमातास्त्वंदक्षपुत्रीसुशोभना मंडलेस्मिन्समागच्छयावत्पूजास्थिरा-
भव तत्रैवादितिं २१ दक्षोसिसर्वकार्येषुमहायज्ञकरप्रियः ऋषिश्चसर्वदा
दक्षमंडलेस्मिन्स्थिरोभव तत्रैवदक्षं २२ तामग्निवर्णांतपसाज्वलंतीं
सर्वदाशुभां भक्तानांवरदांनित्यंदुर्गामावाहयाम्यहं ब्रह्मेंद्रयोर्मध्येदु-
र्गां २३ कृष्णायगोपीनाथायचक्रिणेमुरवैरिणे नमस्तुभ्यंजगद्धात्रेमं
डलेस्मिन्स्थिरोभव तत्रकृष्णं २४ ब्रह्माग्न्ययोमध्येस्वधां २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृत्युरोगानंतकस्यप्रेष्यान्प्राणहरान्गुणान् मंडलेस्थापयामीहपूजार्थंलो
कनाशकान् ब्रह्मयमयोर्मध्येमृत्यरोगान् २६ कुंकुमाभंसदानंदंभक्त
संकटनाशनं चतुर्बाहुंत्रिनेत्रंचमंडलेस्थापयाम्यहं ब्रह्मनिर्ऋतिमध्येग
णेशं २७ पावनाःसर्वलोकानांनिमग्नाःशुद्धिकारकाः सर्वपापहराःश्रे
ष्ठामंडलेस्थापयाम्यहं ब्रह्मवरुणयोर्मध्येआपः २८ सुगंधिनश्चशैला
द्यामंदमंदवहाःसदा तानहंस्थापयामीहमरुतोमंडलेशुभे ब्रह्मवा
खोर्मध्येमरुतः २९ पृथिव्याधार्यतेविश्वंदुर्ग्रहंसागरैर्नरैः अतस्त्वांस्थाप
यामीहब्रह्मणोमंडलेपदे ब्रह्मणःपादमूलेपृथिवीं ३० गंगेचयमुनेचै
वगोदावरिसरस्वति नर्मदेसिंधुकावेरिमंडलेस्थापयाम्यहं ब्रह्मणःपाद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूलेनदीः ३१ समुद्रःसर्वतोयेषुश्रेष्ठोवैहरिवल्लभः मंडलेस्थापयामी
हतंनंदीशंसुखासनये ब्रह्मणः समंतात्सप्तसागरान् क्षारसागरं क्षीर
सा० दधिसा० मधुसा० घृतसाऽइक्षुसा० सुरासा० स्वादोदकसा० तदुपरि
मेरुं नाममंत्रेणपूर्वादिदिक्षु इंद्राणीं स्वाहा प्रथमां नैर्ऋतीं वारुणीं
वाय्वीं कुबेरप्रियां रुद्राणीं ३२ पूर्वादिदिक्षु वज्रं शक्तिं दंडं खड्गं
पाशं अंकुशं गदां त्रिशूलं ३३ पुनःपूर्वादिदिक्षु गजं मेष महिषं श-
वं मकरं मृगं नरं वृषभं ३४ पुनःपूर्वादि ऐरावतं पुंडरीकं वामनं
कुमुदं अंजनं पुष्पदंतं सार्वभौमं सुप्रतीकं ३५ चतुर्दिक्षु गणपतिं
सप्तमातृः दुर्गां क्षेत्राधिपतिं कश्यपं अत्रिं भरद्वाजं विश्वामित्रं गौतमं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जमदग्निं वसिष्ठं अरुंधतीं बाह्येपूर्वादिक्रमेण ऐंद्रीं कौमारीं ब्राह्मीं चं
वाराहींचामुंडां वैष्णवीं माहेश्वरीं वैनायकीं इत्यावाहयामि इतिसर्वतो
भद्रमंडलदेवताः पाद्यादिभिःषोडशोपचारैःसंपूज्यनतिंकुर्य्यात् अथषोडु
शमातृकास्थापनंपूजनंच गौरीपद्माशचीमेधासावित्रीविजयाजया देवसे-
नास्वधास्वाहामातरोलोकमातरः धृतिःपुष्टिस्तथातुष्टिरात्मनःकुलदेवता ग
णेशेनाधिकाह्येते वृद्धौपूज्यास्तुषोडश इतिपाद्यादिभिःसंपूज्यनतिंकुर्य्या-
त् अथतृणमातृकाणांस्थापनंपूजनंच तद्यथा ब्राह्मीमाहेश्वरीचैवकौमा
रीवैष्णवीतथा वाराहीचतथेंद्राणीचामुंडाःसप्तमातरः अथघृतमातृका
पूजनं कुंडयलग्नावसोर्द्धारापंचधाराघृतेनतु कारयेत्सप्तधारानातिनीचा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नचोछ्रिताः१ कीर्तिर्लक्ष्मीर्धृतिर्मेधासिद्धिःप्रज्ञासरस्वती मांगल्येषुप्रपूज्या-
श्चसमैताघृतमातरः २ ॐ वसोःपवित्रमसिशतधारंवसोःपवित्रमसि
सहस्रधारंदेवस्त्वासवितापुनातु वसोःपवित्रेणशतधारेणसुय्यवाकामधुक्ष
ष ॐ भूर्भुवःस्वःघृतमातृभ्यः आवाहनादिपंचोपचारैःसंपूज्य अनयापू
जयाघृतमातरःप्रीयंताम् अथइंद्रध्वजपूजनम् ईशानकोणेस्थापनंच.
अथचतुःषष्टिआवाहनंस्थापनंपूजनंच पाद्यादिभिः षोडशोपचारैः संपूज्य
नतिंकुर्य्यात् अक्षतास्यायुधावापरिवारापसहवाहनायआगछत आदि
ष्टोचतुःषष्टीदेव्योशहपूजनेभ्योनमः अथनाम० गजानना १ सिंहमुखी
२ गृध्रास्या ३ काकतुंडिका ४ उष्ट्रग्रीवा ५ हयग्रीवा ६ वाराही ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शरभानना ८ उलूकीच ९ शिवारवा १० मयूरी ११ विकटानना
१२ अष्टवक्रा १३ कोटराक्षी १४ कुब्जा १५ विकटलोचना १६ शुष्को
दरी १७ ललज्जिह्वा १८ श्वदंष्ट्रा १९ वानरानना २० ऋक्षाक्षी २१
केकराक्षीच २२ बृहत्तुंडा २३ सुराप्रिया २४ कपालहस्ता २५ रक्ता
क्षी २६ शकी २७ श्येनी २८ कपोतिका २९ पाशहस्ता ३० दंडहस्ता
३१ प्रचंडा ३२ चंडविक्रमा ३३ शिशुघ्नी ३४ पापहंत्रीच ३५ काली
३६ रुधिरपायिनी ३७ वसाधया ३८ गर्भभक्षा ३९ शवहस्तां ४० भ्रमा
लिनी ४१ स्थूलकेशी ४२ बृहत्कुक्षिः ४३ सर्पास्या ४४ प्रेतवाहना ४५
ददशूककरा ४६ क्रौंची ४७ मृगशीर्षा ४८ वृषानना ४९ व्यात्तास्या ५०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धूमनिःश्वासा ५१ व्योमैकचरणो ५२ र्ध्वदृक् ५३ तापिनी ५४ शोषिणी
दृष्टिः ५५ कोटरी ५६ स्थूलनासिका ५७ विद्युत्प्रभा ५८ बलाकास्या ५९
मार्जारी ६० कटपूतना ६१ अट्टाट्टहासा ६२ कामाक्षी ६३ मृगाक्षीमृगलो-
चना ६४ नामानीमानियोमर्त्यश्चतुःषष्टिदिनेदिने जपेन्निसंध्यंतस्येह
दुष्टबाधाप्रशाम्यति १ अथप्रधानदेवताः आवाहनस्थापनपाद्यादिभिः सं
पूज्यप्रतिमाया अभ्युत्तारणंकृत्वा पंचगव्येनशुद्धिः कार्यातंतः पंचामृतैःस्नाप-
येत् आवाहनंप्राणप्रतिष्ठाकार्या गंधाक्षतपुष्पधूपदीपनैवेद्यादिआचमनी-
यताम्बूलदक्षिणाभिःपूजयेत् प्रधानदेवतापूजनप्रतिष्ठासांगतासंसिध्यर्थं
यद्यदर्पितंतेनकर्मांगदेवताःप्रीयंतांनमम अथकुशकंडिकाकरणं शुद्धा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यांभूमौदर्भैः परिसमूहनं हस्तमात्रपरिमितांचतुरस्रांभूमिंकुशैः परिसमूह्य-
ता नैशान्यांपरित्यज्य० गोमयोदकेनोपलिप्य० स्रुवमूलेनप्राङ्मुखप्रादेशमात्रमु
त्तरोत्तरक्रमेणाग्निरुल्लिख्य० उल्लेखनक्रमेणाऽनामिकांगुष्ठाभ्यामुद्धृत्यैशान्या
दिशिस्थापयेत् ततोऽदकेनाभ्युक्षणम् एतेपंचभूसंस्काराःन्यत्रयत्राग्निस्थापनं
तत्रतत्रक्रियंते अथाग्नेःस्थापनम् वामहस्तानामिकयाभूमिंस्पृशन्सन्ता-
ग्न्यादिपात्रेणकृतमग्निमानीयात्माभिमुखंनिदध्यात् तद्रक्षार्थंकिंचिन्नियुज्य
आनीताग्निपात्रेअक्षतादिप्रक्षेपः ततोऽग्निंप्रदक्षिणीकृत्यपुष्पचंदनतांबूल
पूगीफलद्रव्यवस्त्राण्यादाय अग्नेर्दक्षिणतोवस्त्रासनास्तरणंकल्पयित्वा० ब्रा
ह्मणंपादप्रक्षालनगंधमाल्यादिभिरभिपूज्य हस्तेधौतवस्त्रोत्तरीय कमंडलुभूषणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिकं गृहीत्वा॰ ॐ अद्यकर्त्तव्यामुकहवनकर्मणिकृताकृतावेक्षणरूपब्रह्मक
र्मकर्त्तुममुकगोत्रममुकशर्माणंब्राह्मणमेभिर्द्रव्याक्षतपुष्पीफलवासोभिर्ब्रह्मत्वे-
नत्वामहंवृणे इतिब्रह्माणंवृणुयात् ततोवृतोस्मि इतिप्रतिवचनं॰ व्रतेनदी-
क्षामाप्नोतिदीक्षयाप्नोतिदक्षिणां दक्षिणयाश्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते
ततोकर्त्ताब्रह्माणंप्रतियथाविहितंकर्मकुरु इत्युक्तेकरवाणीतिब्रह्माब्रूयात् त-
तोऽस्मिन्कर्मणित्वंमेब्रह्माभवेत्यभिधायभवामिइतितेनोक्तेअग्नेर्दक्षिणतः क-
ल्पितासनोपरिउपवेशयेत् ततः प्रणीतापात्रंवरुणकाष्ठमयंद्वादशांगुलोच्चंचतुरं
गुलमध्यरवातंपद्माकृतिंपुरतःकृत्वाजलेनापूर्य कुशैराछाद्य॰ ब्रह्मणोमुखमवलो-
क्यअग्नेरुत्तरतःकुशोपरिनिदध्यात् ततः बर्हिषापरिस्तरणं॰ बर्हिषःकोऽर्थःएकाशी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिदर्भदलानिसंति तेषांचतुर्थभागंकृत्वाएकेनदर्भेणशून्यहस्तोनभवति प्र-
थमभागमादाय आग्नेयादीशानांतं द्वितीयभागमादाय १ ब्रह्मणोग्निप-
र्य्यन्तं तृतीयभागमादाय नैर्ऋत्याद्वायव्यान्तं चतुर्थभागमादाय अ-
ग्नितःप्रणीतापर्यंतं परिस्तरणंकुर्यात् ततोऽग्नेरुत्तरतःपश्चिमदिशि पवि-
त्रछेदनार्थंकुशत्रयं पवित्रकरणार्थं साग्रमनंतर्गर्भंकुशपत्रद्वयं प्रोक्षणीपा-
त्रं आज्यस्थालीचरुस्थाली संमार्जनकुशाः पंचउपयमनकुशाः स-
प्त समिधस्तिस्रः प्रादेशमात्र्यः स्रुवः खादिरः आज्यं षट्पंचाशदुत्तर
शतद्वयमुष्णवछिन्नं तंदुलपूर्णपात्रं दक्षिणावरोवा० पवित्रछेदनकुशा-
नांपूर्वपूर्वदिशिक्रमेणासादनीयम् अथत्रिभिःपवित्रछेदनकुशैर्द्वैपवित्रेछित्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सपवित्रकरेणप्रणीतोदकंत्रिःप्रोक्षणीपात्रेनिधाय प्रोक्षणीपात्रंवामहस्तेकृ
त्वा दक्षिणहस्तानामिकांत्रिः प्रोक्षणीपात्रेनिधाय प्रोक्षणीपात्रंवामहस्तेकृ-
त्वादक्षिणहस्तानामिकांगुष्ठाभ्यांपवित्रेगृहीत्वात्रिरुत्पवनं ततः प्रोक्षणीपा-
त्रं आकाकवत् प्रणीतोदकेनापूर्य्य भूमौपततितदाप्रायश्चित्तंगोदानं ततःप्रो-
क्षणीजलेनयथासादितवस्तुरूपंसेचनं ततो ऽग्निप्रणीतयोर्मध्येप्रोक्षणीपा
त्रंनिदध्यात् आज्यस्थाल्यामाज्यनिर्वापः चरुपात्रेचरुप्रक्षेपः आज्याऽधि
श्रपणं ततोज्वलत्तृणमादायआज्यस्योपरिप्रदक्षिणंभ्रामयित्वावह्नौतत्प्रक्षे-
पः ततःस्रुवप्रतपनंकृत्वा संमार्जनकुशैःस्रुवसंमार्जनं॰ मूलेनमूलं मध्येन-
मध्यं॰ अग्रेणाग्रं पुनः प्रताप्यस्रुवंदक्षिणतोनिदध्यात् ततः आज्योत्तरणं॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवेक्षणं अपद्रव्यनिरसनं ततः उपयमकुशानादायवामहस्तेकृत्वा अग्निप
र्युक्षणंकृत्वा उत्तिष्ठन्मनसाप्रजापतिंध्यात्वातूष्णीमग्नौघृताक्ताःसमिधः
क्षिपेत् उपविश्यसपवित्रप्रोक्षण्युदकेनाग्निंपर्युक्षणीकृत्वा॰ पवित्रेप्रणीतापा
त्रेनिधाय पातितदक्षिणजानुः कुशेनब्रह्मणान्वारब्धः समिद्धृतमेवाग्नौस्रुवेणा
ज्याहुतिंजुहोति तत्राज्यादारभ्यद्वादशाहुतिषु अनंतरंस्रुवस्थितशेषघृत
स्यप्रोक्षणीपात्रेप्रक्षेपः इतिकुशकण्डिकापद्धतिः ∨ अथसमिद्विधिः समिद-
र्कमयीभानोः पालाशीशशिनस्तथा खादिराभूमिपुत्रस्य अपामार्गीबुधस्यच
गुरोरश्वत्थजाप्रोक्ता शुक्रस्यौदुम्बरीमता शमिजातुशनेः प्रोक्ताराहोर्दूर्वामयीत
था केतोर्दर्भमयीप्रोक्तान्येषांपालाशवृक्षजा१ अर्कीनाशयतेव्याधिंपालाशीस-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्वकामदा खादिराअर्थलाभायापामार्गोदृष्टप्रदर्शिनी प्रजालाभायचाश्वत्थी
स्वर्गायोदुंबरीभवेत् शमीशमयतेपापंदूर्वादीर्घायुरेवच्च कुशाःसर्वार्थकामा
नांपरमंरक्षणंविदुः २ यथाबाणप्रहाराणांकवच्चंभवतिवारणं तद्वद्दैवोपघा
तानांशांतिर्भवतिवारणं ३ यथासमुत्थितंयंत्रंयंत्रेणप्रतिहन्यते तथासमुत्थि
तंघोरंशीघ्रंशांत्याप्रशाम्यति ४ अथाग्न्यावाहनंपूजनंच ततःकुंडमध्ये ॐ
रं इतिवन्हिबीजंलिखेत् उत्पत्तिमुद्रांकृत्वाथावाहयेदग्निपूरुषं रुद्रतेजःसमु-
द्भूतंद्विमूर्धानंद्विनासिकं स्रुचंस्रुवंचशक्तिंचअक्षमालांचदक्षिणैः तोमरंव्यजनं
चैवघृतपात्रंतुवामकैः बिभ्रतंसप्तभिर्हस्तैर्द्विमुखंसप्तजिव्हकं दक्षिणंचचतु-
र्जिव्हंत्रिजिव्हमुत्तरंमुखं द्वादशकोटिमूर्त्यारव्यंद्विपंचाशत्कलायुतं स्वाहा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वधावषट्कारैरंकितंमेषवाहनं रक्तमाल्यांबरंरक्तंरक्तपद्मासनस्थितं रौद्रंवागी-
श्वरीरूपंवन्हिमावाहयाम्यहं त्वंमुखंसर्वदेवानांसप्तर्चिरमितद्युते आगच्छभगव-
न्नग्नेयज्ञेस्मिन्संनिधौभव अग्नेवैश्वानरइहागच्छइहतिष्ठ इत्यावाह्यपंचोप-
चारैःपूजयेत् ततःअग्नेःसप्तजिव्हानांपूजा कनकायैनमः रक्तायैनमः कृष्णा
यैनमः उदीरण्यायैनमः उत्तरमुखे सुप्रभायैनमः बहुरूपायैनमः अतिरिक्ता-
यैनमः तदनंतरं स्रुवसमिद्वनस्पतीनांपूजनंच इति ॐ अद्येत्यादिअमुकगो
त्रोमुकनामाहंसकुटुंबस्यसपरिवारस्यात्मनःसदाभीष्टफलप्राप्त्यर्थं अमुकयज्ञ
कर्मणाश्रीसूर्यादिनवग्रहादीनां साधिदेवताप्रत्यधिदेवतानांपंचलोकपालदश
दिक्पालामुकप्रधानदेवतासहितानांचप्रीतये ब्राह्मणद्वारायवतिलधान्याज्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शर्करादिद्रव्यैस्तत्तद्देवतामंत्रैर्यक्ष्ये ततोमनसिव्याहृतिभिराहुतीर्दद्यात् अथहो
मः ॐ नमःप्रजापतयेस्वाहा इदंप्रजापतयेनमम ॐ इंद्रायस्वाहा इदमिंद्राय०
ॐ अग्नयेस्वाहा इदमग्नये० ॐ सोमायस्वाहा इदंसोमाय० ॐ भूःस्वाहा इदं
भूः० ॐ भुवःस्वाहा इदंवायवे० ॐ स्वःस्वाहा इदंसूर्य्याय० एतामहाव्याहृतयः
यथाबाणप्रहाराणांकवचंभवतिवारणं तद्वद्दैवोपघातानांशांतिर्भवतिवारणं
शांतिरस्तु पुष्टिरस्तु वृद्धिरस्तु यत्पापंतत्प्रतिहतमस्तु द्विपदेचतुष्पदेसुशांति
र्भवतु इतिप्रायश्चित्तहोमः अथपंचवारुणीहोमः ॐ त्वन्नोअग्नेवरुणस्यवि
द्वान्देवस्यहेडोअवयाशशिष्ठा यविष्ठोवह्नितमःशोसुचानोविश्वादेषाꣳसिप्रमुमु-
ग्ध्यस्मत्स्वाहा इदमग्निवरुणाभ्याम् १ ॐ शतन्नोग्नेवमोभवतिनेदिष्ठो ऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्याउषसोव्युष्टौअवयवेक्षणेवरुण २ रराणोव्रीहीमृदीक २ सुहवोनएधिस्वाहा
इदमग्निवरुणाभ्याम्॰ अयाश्चाग्नेअस्यनभिशस्तियाश्चसत्वमयासिअयानोय
ज्ञवहास्यानोधेहिभेषजंस्वाहा इदमग्नये अं येतेशतंवरुणंयेसहस्रंयज्ञिया
पासावितत्तामहांतस्तेभिर्नो ऽद्यसवितेतविष्णुविश्वेमुंचंतुमरुतः स्वर्कायस्वाहा
इदंवरुणायसवित्रेविष्णवेविश्वेभ्योमरु ध्भ्यःस्वर्केभ्यःअं उदुत्तमंवरुणपाशम-
स्मद्वाघनंविमध्यमज्ञंश्रथायअथावयमादित्यव्रतेतवानागसोदितयेस्यामस्वाहा
इदंवरुणादितये अत्रोदकस्पर्शः इतिपंचवारुणीहोमः ॥ अथनवग्रहाणांहोमः
तत्रादौनवग्रहाणांसमिधः अर्कः पलाशःखदिरो अपामार्गोथपिप्पलः औदुंबरः
शमिर्दूर्वाकुशाश्चसमिधःक्रमात् ततोघृताक्ताःसमिधोजुहुयात् अं आकृष्णे

हो-

२४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नरजसावर्त्तमानोनिवेशयन्नमृतंमर्त्यंचा हिरण्ययेनसवितारथेनादेवोयातिभुव-
नानिपश्यन्स्वाहा इदंसूर्याय॰ ॐ इमंदेवाअसपत्न॰ सुवध्वमहतेक्षत्रायमहते
ज्यैष्ठायमहतेजानराज्यायइन्द्रस्येंद्रियायइमममुष्यपुत्रममुष्यैपुत्रमस्यैविशएष
वोमीराजासोमोऽस्माकंब्राह्मणाना॰ राजास्वाहा इदंचंद्रमसे॰ ॐ अग्निर्मूर्द्धादि
वः ककुत्पतिःपृथिव्याअयं अपा॰ रेता॰ सिजिन्वतिस्वाहा इदंमंगलाय॰ ॐ
उद्बुध्यस्वाग्नेप्रतिजागृहीत्वष्टापूर्त्तेस॰ सृजेथामयंच अस्मिन्स्वधस्थेअध्युत्त
रस्मिन्विश्वेदेवायजमानश्चसीदतस्वाहा इदंबुधाय॰ ॐ बृहस्पतेअतियदर्योअ-
र्हाद्युमद्विभातिक्रतुमज्जनेषु॰ यद्दीदयच्छवसऋतप्रजाततदस्मासुद्रविणंधे-
हिचित्रमृस्वाहा इदंबृहस्पतये॰ ॐ अन्नात्परिश्रुतोरसंब्रह्मणाव्यपिबत्क्षत्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पयस्सोमंप्रजापतिः ऋतेनसत्यमिंद्रियंविपानꣳ शुक्रमंधसइंद्रस्येंद्रियमिदंप-
योमृतंमधुस्वाहाइदंशुक्राय ॐ शन्नोदेवीरभीष्टयआपोभवन्तुपीतये शंयोरभि
स्रवंतुनःस्वाहा इदंशनैश्चराय० ॐ कयानश्चित्रआभुवदूतीसदावृधःसखा
कयाशचिष्ठयावृतास्वाहा इदंराहवे० ॐ केतुंकृण्वन्नकेतवेपेशोमर्याअपेश-
से समुषद्भिरजायथास्वाहा इदंकेतवे० इतिनवग्रहाणांहोमः अथनव
ग्रहाऽधिदेवतानांहोमः ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं उर्वारुकमिव
बंधनान्मृत्योर्मुक्षीयमामृतात्स्वाहा इदंत्र्यंबकाय० ॐ श्रीश्चतेलक्ष्मीश्चप-
त्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तंइष्णंनिषाणामुम्मईषाणसर्वलो
कमयीषाणस्वाहा इदंउमायै ॐ यदक्रंदःप्रथमंजायमानउद्यत्समुद्रादुत-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वापुरीषात् श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यंमहिदिविजातंते ऽर्वन्स्वाहा
इदंस्कंदाय॰ ॐ विष्णोरराटमसिविष्णोस्त्रप्रेस्थोसिविष्णोस्यूरसिविष्णो ध्रु
वोसिवैष्णवमसिविष्णवेत्वास्वाहा इदंविष्णवे ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ता-
द्विशीमतःसुरुचोवेनआवः सबुध्न्याउपमाअस्यविष्ठासतश्चयोनिमस-
तश्चविवःस्वाहा इदंब्रह्मणे॰ ॐ त्रातारमिंद्रमवितारमिंद्रꣳहवेहवेसुहव-
वꣳसूरमिन्द्रꣳ हयामिशक्रंपुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रःस्वाहा
इदमिन्द्राय ॐ असियमोस्यादित्यो ऽर्वन्नसिश्रितोगुह्येनव्रतेनअसिसोमे
नसमयाविपृक्त आहुस्तेत्रीणिदिविबंधनानिस्वाहा इदंयमाय अत्रोद-
कस्पर्शः ॐ कार्षिरसिसमुद्रस्यत्वाक्षित्याउन्नयामिसमायोऽद्भिरग्मन्तसमो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षधिभिरोषधिःस्वाहा इदंकालाय अत्राप्युदकस्पर्शः ॐ इंधानास्त्वास होम
तꣳ हिमाद्यमंतःसमिधिमहिवयस्त्वंतोवयस्कृतमग्नेसपत्नदंमनमदध्वं-
तोदीभ्यांचित्रावसोस्वस्तितेपारमृसियस्वाहा इदंचित्रगुप्ताय ꣳ इतिनवग्रहा
ऽधिदेवतानांहोमः अथनवग्रहप्रत्यधिदेवतानांहोमः ॐ अग्निंदूतंपुरोदधे
हव्यवाहमुपब्रुवे देवाꣳ आसादयादिहस्वाहा इदमग्नये ॐ अयस्वंतर
ममृतमस्मुभेषजमयामतेप्रशस्तिष्वशोभवतुवाजिनः देविनीरायोयोवहर्म्मिः
प्रसूतिः ककुष्णानवाजसास्तोनयवाꣳ स्वेतःस्वाहा इदमद्भ्यः ॐ स्योनापृथि- २६
वीभवानृक्षरानिवेशनीयछानःशर्मसप्रथास्वाहा इदंपृथिव्यै ॐ इदंविष्णु
र्विचक्रमेत्रेधानिदधेपदंसमूढमस्यपाꣳसुरेस्वाहा इदंविष्णवे ॐ सजोषाइं-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रसगणोमरुद्भिःसोमंपिबबृहस्पतेसवित्रात्वसवोधुवन्तुजहिशत्रूँ२रपमृधोनुदस्वाथाभयंकृ
णुहिविश्वतोनःस्वाहा इदमिन्द्रायः ॐ आदित्यैरास्नासीन्द्रायाउष्णी-
षःपूषासिचर्मायदीदमःस्वाहा इदमिन्द्राण्यै ॐ प्रजापतेनत्वदेतान्यन्योवि
श्वारूपाणिपरिताबभूवयत्कामास्तेजुहुमस्तंनोअस्तुवयँ२स्यामपतयोरयीणा
ँ२स्वाहा इदंप्रजापतये ॐ नमोस्तुसर्पेभ्योयकेचपृथिवीमनुयेअंतरिक्षेये-
दिवितेभ्यःसर्पेभ्योनमःस्वाहा इदंसर्पेभ्यः ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्वि-
शीमतःसुरुचोवेनआवः सुबुध्याउपमाअस्यविष्ठासतश्चयोनिमसतश्चविवः
स्वाहा इदंब्रह्मणे इतिनवग्रहप्रत्यधिदेवतानांहोमः अथपंचलोकपालानां
होमः ॐ गणानांत्वागणपतिँ२हवामहेप्रियाणांत्वाप्रियपतिँ२हवामहेनिधीनांत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निधिपतिꣳहवामहेवसोममआहमजानिगर्भधमात्मजासिगर्भधंस्वाहा इदंग
णपतयेॐ अम्बेअम्बिकेअम्बालिकेमानयतिकश्चनसमस्यस्वकः शुभद्रिकांकां
पीलवासिनींस्वाहा इददुर्गायै ॐ वातोवागंधर्वास्तविंशतिस्तेअग्नेसमयुजं
स्तेअस्मिजवमादधुःस्वाहा इदंवायवे ॐ उर्ह्वाअसूरःसमिभवत्यूर्ह्वाशोचि-
ष्यग्नेपुनामासुसुप्रतीकस्यसुनोस्वाहा इदमाकाशाय ॐ अश्विनीभैषज्येन
तेजसेब्रह्मवर्चसायाभिषिंचामिसरस्वत्यैभैषज्येनवीर्यायान्नाद्याभिषिंचामि
इन्द्रस्येन्द्रियेनबलायश्रियैयशसेभिषिंचामिस्वाहा इदमश्विभ्यां॰ इतिपं
चलोकपालानांहोमः अथदशदिक्पालानांहोमः ॐ त्रातारमिंद्रमवितारमि-
न्द्रꣳ हवेहवेसुहवꣳसूरमिन्द्रꣳ॰हयामिशक्रंपुरुहूतमिंद्रꣳस्वस्तिनोमघवाधा-

होम
२७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्विन्द्रःस्वाहा इदमिन्द्राय ॐ अग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवेदेवाꣳ आसाद
यादिःस्वाहा इदमग्नये ॐ असियमोऽस्यादित्योर्वभसिब्रितोगुह्येनव्रतेनअ
सिसोमेनसमयाविपृक्तआहुस्तेत्रीणिदिविबंधनानिस्वाहा इदंयमाय ॐ ए
षतेनिर्ऋतेभागस्तंजुषस्वस्वाहा अग्निनेत्रेभ्योदेवेभ्यःपुरुसद्भ्यःस्वाहायमने
त्रेभ्योदेवेभ्योदक्षिणासद्भ्यःस्वाहाविश्वदेवनेत्रेभ्योदेवेभ्यः उपरिसद्भ्यो ऽधःस-
द्भ्यःस्वाहामित्रावरुणनेत्रेभ्योदेवेभ्योउत्तरासद्भ्यःस्वाहासोमनेत्रेभ्योदेवेभ्यऊ-
परिसद्भ्यो ऽधःसद्भ्यःस्वाहा इदंनिर्ऋतये ॐ इदंवरुणशुषिहवमयाचमउप-
त्वामवस्यराचकेस्वाहा इदंवरुणाय ॐ वायुरग्नेगायत्रीःसाकगनूमन-
सायत्रिशिवोनिषद्भिःशिवाभिःस्वाहा इदंवायवे ॐ कुविदंगवयमन्तोवयं-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिद्यथादान्यानुपूर्वंविजइहेहैषांकृणुहिभोजनाबर्हिषोनमउक्तिंयजंतिस्वाहा
इदंकुबेराय ॐ ईशावास्यमिद ५ सर्वंयत्किंचिज्जगत्यांजगत्तेनत्यक्तेनभं-
जिथामामृधःकस्यचिद्धनंस्वाहा इदमीशानाय अग्नोदकस्पर्शः ॐ नमो
स्तुसर्प्पेभ्योयेकेचनपृथिवीमनु येअंतरिक्षेयेदिवितेभ्यःसर्पेभ्योनमःस्वाहा-
इदमनंताय ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विशीमतःसुरुचोवेनआवःसुबुध्या
उपनाअस्यविष्ठासतश्चयोनिमसतश्चविवःस्वाहा इदंब्रह्मणे इतिदश-
दिक्पालानांहोमः अथप्रधानदेवस्यहोमः ॐ नमोभगवतेवासुदेवायस्वा
हा शांताकारंभुजगशयनंपद्मनाभंसुरेशंविश्वाधारंगगनसदृशंमेघवर्णंशुभां
गं लक्ष्मीकांतंकमलनयनंयोगिभिर्ध्यानगम्यं वंदेविष्णुंभवभयहरंसर्वलो-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कैककनाथं १ ॐ नमःशिवाय ध्यायेनित्यंमहेशंरजतगिरिनिभंचारुचंद्रावतं
संरत्नाकल्पोज्ज्वलागंपरशुमृगवराभीतिहस्तंप्रसन्नं पद्मासीनंसमंतात्स्तु-
तममरगणैर्व्याघ्रकृत्तिंवसानं विश्वाद्यंविश्ववंद्यंनिखिलभयहरंपंचवक्त्रंत्रिनेत्रं
२ तत्रदुर्गोत्सवे ॐ जयंतीमंगलाकालीभद्रकालीकपालिनी दुर्गाक्षमा
शिवाधात्रीस्वाहास्वधानमोस्तुते ३ अमुकप्रधानदेवायस्वाहा॰ अथानंत
रंव्याहृतिहोमः ॐ भूःस्वाहा इदमग्नये॰ ॐ भुवःस्वाहा इदंवायवे॰ ॐ
स्वःस्वाहा इदंसूर्याय॰ इतिव्याहृतिहोमः अथसर्वतोभद्रमंडलदेवतानां
होमः गणपतयेस्वाहा॰ दुर्गायैस्वाहा॰ ब्रह्मणे॰सोमाय॰ ईशानाय॰इन्द्राय॰
अग्नये॰यमाय॰ निर्ऋतये॰वरुणाय॰वायवे॰ धुवाय॰ अध्वराय॰ सोमाय॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अज्यः अनिलाय० नलाय० प्रत्यूषाय० प्रभासाय० अजाय० एकपदे० अहिर्बु
ध्न्याय० विरूपाक्षाय० रैवताय० हराय० बहुरूपाय० त्र्यंबकाय० सुरेश्वराय० सवि
त्रे० जयंताय० पिनाकिने रुद्राय० धात्रे० मित्राय० यमाय० रुद्राय० वरुणाय० सूर्या
य० भगाय० विवस्वते० पूष्णे० सवित्रे० त्वष्ट्रे० विष्णवे० अश्विभ्यां० क्रतवे०
दक्षाय० वसवे० सत्याय० कालाय० कामाय० अध्वरे० रोचनाय० पुरूरवसे० आ-
र्द्रवाय० सोमपाय० अग्निष्वात्ते० बर्हिषदे० सुकालाय० एकशृंगाय० शूद्राय० सोमा
य० कश्यपाय० अत्रये० भरद्वाजाय० विश्वामित्राय० गौतमाय० जमदग्नये० व-
शिष्ठाय० अनंताय० वासुकये० शेषाय० तक्षकाय० कर्कोटकाय० पद्माय० महा
पद्माय० शंखशलाय० कंबलाय० पिशाचेभ्यः गुह्यकेभ्यः सिद्धेभ्यः भूतेभ्यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्पेभ्यः॰ विश्वावसवे॰ गंधर्वाय॰ हाहे॰ हूहवे॰ घृताच्यै॰ मेनकायै॰ रंभायै॰ उर्व
श्यै॰ तिलोत्तमायै॰ सुकेश्यै॰ मंजुघोषायै॰ रुद्रेभ्यः॰ स्कंदाय॰ नंदीश्वराय॰ शूला
य॰ महादेवाय॰ रुद्राय॰ श्रियै॰ विष्णवे॰ मरुद्गणाय॰ पितृभ्यः॰ गणायस्वा॰ मृत्य
वे॰ रोगाय॰ वसुभ्यः॰ विघ्नराजाय॰ अद्भ्यः॰ समीरणाय॰ मरुताय॰ मरुते॰ ज
गत्प्राणाय॰ समीरणाय॰ मातरिश्वने॰ मेदिन्यै॰ गंगायै॰ सरस्वत्यै॰ शरय्वै॰
कौशिक्यै॰ वेत्रवत्यै॰ गोदायै॰ ताप्यै॰ रेवायै॰ पयोदायै॰ कृष्णायै॰ भीमरथ्यै॰
तुंगभद्रायै॰ क्षुद्रनदीभ्यः॰ लवणसमुद्राय॰ इक्षुसमुद्राय॰ सुरासमुद्राय॰ सर्पिः
समुद्राय॰ दधिसमुद्राय॰ क्षीरसमुद्राय॰ जीवनसमुद्राय॰ आदित्याय॰ सो-
माय॰ भौमाय॰ बुधाय॰ बृहस्पतये॰ शुक्राय॰ शनैश्चराय॰ राहवे॰ केतवे॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्म्यै॰ माहेश्वर्यै॰ कौमार्यै॰ वैष्णव्यै॰ वाराह्यै॰ इंद्राण्यै॰ चामुंडायै॰ वज्राय॰ हो॰
शक्तये॰ दंडाय॰ खड्गाय॰ पाशाय॰ अंकुशाय॰ गदायै॰ त्रिशूलाय॰ पद्माय॰
चक्राय॰ श्रीमहाविष्णवेस्वाहा॰ ४ अथदशदिक्पालादीनांबलिदानम् तद्यथा
पूर्वेइंद्रायसांगायसपरिवारायसायुधायसशक्तिकायएतंसदीपंदधिमाषभक्त
बलिंसमर्पयामि ॥ भोइंद्रदिशंरक्षबलिंभक्षअस्ययजमानस्यसकुटुंबस्य आ-
युष्कर्ताशांतिकर्तापुष्टिकर्तातुष्टिकर्तावरदोभव १ ॥ आग्नेय्यां अग्नयेसांगायस
परिवारायसायुधायसशक्तिकायएतंसदीपंदधिमाषभक्तबलिंसमर्प्ययामि भो
अग्नेदिशंरक्षबलिंभक्षयजमानस्यसकुटुंबस्य आयुष्कर्ताक्षेमकर्ताशांतिकर्ता ३०
तुष्टिकर्तापुष्टिकर्तावरदोभव २ ॥ दक्षिणे यमायसांगायसपरिवारायसायु-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धायसशक्तिकायएतंसदीपंदधिमाषभक्तबलिंसमर्पयामि भोयमदिशंर-
क्षबलिंभक्षयजमानस्यसकुटुंबस्यआयुःकर्ताक्षेमकर्तातुष्टिकर्तापुष्टिकर्तावर-
दोभव ३ नैर्ऋत्यां निर्ऋतयेसांगायसपरिवारायसायुधायसशक्तिका-
यएतंसदीपंदधिमाषभक्तबलिंसमर्पयामि भोनिर्ऋतेदिशंरक्षबलिंभक्ष
अस्ययजमानस्यसकुटुंबस्यआयुःकर्ताक्षेमकर्ताशांतिकर्तातुष्टिकर्तापुष्टि
कर्तावरदोभव ४ पश्चिमे वरुणायसांगायसपरिवारायसायुधायसश-
क्तिकायएतंसदीपंदधिमाषभक्तबलिंसमर्प्पयामि भोवरुणदिशंरक्षबलिंभ-
क्षअस्ययजमानस्य सकुटुंबस्य आयुःकर्ताक्षेमकर्ताशांतिकर्तातुष्टिकर्ता
पुष्टिकर्तावरदोभव ५ वायव्यां वायवेसांगायसपरिवारायसायुधाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सशक्तिकाय एतंसदीपंदधिमाषभक्तबलिंसमर्पयामि भोवायोदिशंरक्षब-
लिंभक्षअस्ययजमानस्यसकुटुंबस्यआयुःकर्ताक्षेमकर्ताशांतिकर्त्तातुष्टिक-
र्तापुष्टिकर्तावरदोभव ६ उत्तरे कुबेरायसांगायसपरिवारायसायुधायसश-
क्तिकाय एतंसदीपंदधिमाषभक्तबलिंसमर्प्पयामि भोकुबेरदिशंरक्षबलिं-
भक्षअस्ययजमानस्यसकुटुंबस्यआयुःकर्त्ताक्षेमकर्ताशांतिकर्तातुष्टिकर्तापु
ष्टिकर्तावरदोभव ७ ईशान्यां ईशानायसांगायसपरिवारायसायुधायसश
क्तिकाय एतंसदीपंदधिमाषभक्तबलिंसमर्पयामि भोईशानदिशंरक्षबलिं
भक्षअस्ययजमानस्यसकुटुंबस्यआयुःकर्ताक्षेमकर्ताशांतिकर्तातुष्टिकर्तापु-
ष्टिकर्तावरदोभव ८ ईशानपूर्वयोर्मध्ये ब्रह्मणेसांगायसपरिवारायसा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युधायसशक्तिकायएतंसदीपंदधिमाषभक्तबलिंसमर्पयामि भोब्रह्मन्दि
शंरक्षबलिंभक्षअस्ययजमानस्यसकुटुंबस्यआयुःकर्ताक्षेमकर्ताशांतिकर्ता-
तुष्टिकर्तापुष्टिकर्तावरदोभव ९ निर्ऋतिपश्चिमयोर्मध्ये अनंतायसांगा-
यसपरिवारायसायुधायसशक्तिकायएतंसदीपंदधिमाषभक्तबलिंसमर्प्पया-
मि भोअनंतदिशंरक्षबलिंभक्षअस्ययजमानस्यसकुटुंबस्यआयुःकर्ताक्षेम
कर्ताशांतिकर्तातुष्टिकर्तापुष्टिकर्तावरदोभव १० इतिदशदिक्पालबलिः
अथनवग्रहबलिः ग्रहेभ्यः सांगेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्ति
केभ्यः एतंसदीपंदधिमाषभक्तबलिंसमर्प्पयामि भोभोग्रहाः दिशोरक्षध्वं
बलिंभक्षध्वं अस्ययजमानस्यसकुटुंबस्यआयुः कर्तारः शांतिकर्तारःतुष्टिकर्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रः पुष्टिकर्त्तारः वरदाभवत इतिग्रहादिबलिः दुर्गायैसांगायैसपरिवारायै
सायुधायैसशक्तिकायै एतंसदीपंदधिमाषभक्तबलिंसमर्प्पयामि भोदुर्गेदिशं-
रक्षबलिंभक्षअस्ययजमानस्यसकुटुंबस्यआयुःकर्त्रीक्षेमकर्त्री शांतिकर्त्रितु-
ष्टिकर्त्रीपुष्टिकर्त्री वरदाभव इतिदुर्गायैबलिंदद्यात् अथक्षेत्रपालबलिः
दधिमाषसिंदूरकज्जलदीपद्रव्यसहितंपात्रेनिधाय॰ क्षेत्रपालायशाकिनी
डाकिनीभूतप्रेतवेतालपिशाचसहिताय इमंबलिंसमर्प्पयामि भोक्षेत्रपाल
दिशोरक्षबलिंभक्षममयजमानस्यसकुटुंबस्यसपरिवारस्य आयुःकर्ताक्षेम
कर्त्ता शांतिकर्त्ता तुष्टिकर्त्ता पुष्टिकर्त्ता वरदोभव १ ततः ॐ भूतायत्वावरात्त
येश्वरबिभिष्येरवंद्रं हंतादुर्य्यांव्यामुर्वंत्तरिक्षमन्वेमीः पृथिव्यास्त्वानाभौसादया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यदित्यासुपस्थे अग्नेहव्यꣳरक्ष अनेनक्षेत्रपतिबलिनेतारंप्रतितंदुलान्प्रदि
पेत् तदंतेस्विष्टकृतहोमः ॐ अग्नयेस्विष्टकृतेस्वाहा इदमग्नयस्विष्टि
कृते इतिस्विष्टिकृत् ब्रह्मणेपूर्णपात्रदानं अद्येत्यादिकृतस्यास्ययागस्य
सांगतासिद्ध्यर्थमिदंपूर्णपात्रंप्रजापतिदैवतंब्रह्मणेदातुमहमुत्सृजे ततो
ब्रह्मग्रंथिविमोकः ॐ सुमित्रियानआपओषधयःसन्तु इतिपवित्रकंगृ
ह्यात्वाप्रणीताजलेनशिरःसमृज्य ॐ दुर्मित्रियास्तस्मैसन्तुयोस्मान् द्वेष्टि
यंचवयंचद्विष्मः इतिऐशान्यांप्रणीतान्यु ह्यंकुर्य्यात् ततोगोदानं अथ
पूर्णाहुतिसंकल्पः अद्येत्यादिअमुकमासे अमुकपक्षे अमुकतिथौ
अमुकवासरे अमुकयज्ञकर्मणा अमुकइष्टदेवताप्रीत्तयेममसमनोभिलषि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तधर्मार्थकामादियथेप्सितायुरारोग्यमैश्वर्यपुत्रपशुसख्विसुहृत्संबंधिबंधुसं
पदिष्टादिप्राप्तये च ब्राह्मणद्वारा मत्कारितअमुकयज्ञकर्मणिगणपतिगौर्यादिनव-
ग्रहादिअधिदेवप्रत्यधिदेवपंचलोकपालदशदिक्पालाद्यावाहितेष्टदेवतापीतये स्वे
र्मंत्रैर्यवतिलतंदुलाज्याहुतिभिःपरिपूर्णतासिद्धयेपूर्णाहुतिहोममहंकरिष्ये ✓ य
जमानःसपत्नीकः आचार्यस्यदक्षिणस्कंधंस्पृशन्ताम्बूलपूगीफलाक्षतघृतंधा
घृतपूर्णनारीकेलंवास्रुवेकृत्वापूर्णाहुतिंदद्यात् तद्यथा ॐ पूर्णादर्विपरापत
सुपूर्णा पुनरापता वस्नेचविक्रीणावहइषमूर्ज ९ शतक्रतोस्वाहा इतिपूर्णाहु-
तिः अथबर्हिर्होमः ॐ देवोगातुविदोगातुवित्वागातुमितोपनसस्पतइमंदे
वयज्ञंस्वाहा वात्रेधा इतिबर्हिर्होमः अथभस्मवंदनं आयुषकरणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ त्र्यायुषं जमदग्नेः इतिललाटे कश्यपस्यत्र्यायुषं इतिग्रीवायां यद्देवेषुत्र्या
युषमितिदक्षिणबाहुमूले तन्नोस्तुत्र्यायुषमितिहृदि इतित्र्यायुषकरणम्
ततः नीराजनं साज्यंत्रिवर्तिसंयुक्तंवन्हिनायोजितंमया दीपंगृहाणदेवेश
त्रैलोक्यतिमिरापहं ततः पुष्पांजलिंगृहीत्वा यज्ञेनयज्ञमयजंतदेवास्तानि ध-
र्माणिप्रथमान्यासं तेहनाकमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः १ राजाधि
राजायप्रसह्यसाहिने नमोवयंवैश्रवणायकुर्महे समेकामान्कामकामायम-
ह्यंकामेश्वरोवैश्रवणोददातु कुबेराजवैश्रवणाय महाराजायनमः ॐस्वस्तिसा-
म्राज्यंभौज्यंस्वाराज्यंवैराज्यंपारमेष्ठ्यंराज्यंमहाराज्यमाधिपत्यमयंसमंतपर्या ई-
स्यात्सार्वभौमःसार्वायुषआंतादापरार्धात्पृथिव्यैसमुद्रपर्यंताया एकराळिति त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दप्येषश्लोकोभिगीतोमरुतःपरिवेष्टारोमरुत्तस्यावसन्गृहे आविक्षितस्यका-
मप्रेर्विश्वेदवाःसभासदइति विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरतवि
श्वतःपात् संबाहुभ्यांधमतिसंपतत्रैद्यावाभूमिजनयंदेवएकः श्रीभवा
निशंकरमहाविष्णुपंचायनदेवताभ्योनमः मंत्रपुष्पांजलिंसमर्पयामि यानि
कानिचपापानिजन्मांतरकृतानिच तानितानिविनश्यंतिप्रदक्षिणपदेपदे अ-
पराधसहस्राणिक्रियंतेहर्निशंमया दासोहंक्षम्यतांदेवक्षमस्वपरमेश्वर आवा
हनंनजानामिनजानामिविसर्जनं पूजांचैवनजानामिक्षम्यतांपरमेश्वर अन्य-
थाशरणंनास्तित्वमेवशरणंमम तस्मात्कारुण्यभावेनरक्षत्वंपरमेश्वर इति
प्रार्थना अथदक्षिणासंकल्पः इदंब्रह्मणे इदमाचार्याय इदमृग्वेदमूर्तये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यजुर्वेदमूर्तये सामवेदमूर्तये अथर्ववेदमूर्तये हिरण्यान्नभूदानं कांस्यपा
त्रंसोमदैवतं ताम्रपात्रंसूर्यदैवतं हिरण्यमग्निदैवतं रजतंपितृदैवतं आसनं
वनस्पतिदैवतं कमंडलुं वरुणदैवतं कंकणंवरुणदैवतं मुकुटंप्रजापतिदैवतं
उपानद्यौयमदैवते शय्यातुलिकेंद्रदैवते गवांब्रह्मणेत्यादिषडरित्विग्भ्यो यद्दत्तं
तद्यज्ञपुरुषः प्रजापतिः प्रीयतां ततोभिषेकंकुर्यात् पत्नीवामतः रुद्रकलशा-
त्पल्लवोदकैः सकलत्रपुत्रमभिषिंचेत् ॐ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यां
पूष्णोहस्ताभ्यां सरस्वत्यैवाचो जंतुर्यंत्रेदुधामिबृतेष्टाः साम्राज्येनाभिषिंच्चा
म्यसौ ॐ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांसरस्वत्यैवा-
चो जंतुर्यंत्रेणाग्नेःसाम्राज्येनाभिषिंचामिॐ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूष्णोहस्ताभ्यामश्विनौभैषज्येनतेजसेब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यैभैष
ज्येनवीर्यायान्नाधायाभिषिंञ्चामि इंद्रस्येंद्रियेणबलायश्रियैयशसेनाभिषिंचामि
ॐ पालाशंभवतितेनब्राह्मणोभिषिंचामि ब्रह्मणोवैपलाशोब्रह्मणैनमेतदभि-
षिंचामि यद्वैवकल्पांजुहोतिप्राणावैकल्पाअमृतमुवैप्राणाअमृतेनवैनमेतदभि
षिंचामि सर्वेषांवाएषवेदानाꣳ सोयत्समसर्वेषामेवैनमेतद्वेदानाꣳसेनाभिषि-
ञ्चामि आपोहिष्टेतिभिभिः गणाधिपोभानुशशीधरासुतोबुधोगुरुर्भार्गवसूर्यन-
न्दना राहुश्चकेतुप्रभृतिर्नवग्रहाः कुर्वन्तुवःपूर्णमनोरथंसदा १ उपेन्द्रइन्द्रोव-
रुणोहुताशनोधर्मोयमोवायुहरिश्चतुर्भुजःगंधर्वयक्षोरगसिद्धचारणाः कुर्वन्तु-
वःपूर्णमनोरथंसदा २ नलोदधीचिःसगरःपुरूरवाःसकौन्तलेयोभरतोधनंजय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामत्रयं वेनबलिर्युधिष्ठिरःकुर्वन्तुवःपूर्णमनोरथंसदा ३मनुर्मरीचिर्भृगुदक्षनारदा
पराशरोव्यासवशिष्ठभार्गवाः वाल्मीकिकुम्भोद्भवगर्गगौतमाः कुर्वन्तुवःपूर्णमनो
रथंसदा ४ रम्भासती सत्यवतीचदेवकी गौरीचलक्ष्मीश्चदितिश्चरुक्मिणी कूर्मो
गजेन्द्रोऽप्यचराचराधरा कुर्वन्तुवःपूर्णमनोरथंसदा ५ गंगाचक्षिप्रायमुनासरस्व
तीगोदावरीवेत्रवतीचनर्मदा साचन्द्रभागावरुणाअशीनदीकुर्वन्तुवःपूर्णमनोरथं
सदा ६ तुङ्गम्प्रभासंङ्गुरुचक्रपुष्करङ्ग्याभिमुक्तोबदरीवटेश्वरःकेदारपम्यासुरनैमि
षारकंकुर्वन्तुवःपूर्णमनोरथंसदा ७ शंखश्चदूर्वासितपत्रचामरम्मणिःप्रदीपोवररत्न
कांचनम् सम्पूर्णकुंभःसहितोहुताशनःकुर्वन्तुवःपूर्णमनोरथंसदा ८ प्रयाण
कालेयदिवासुमङ्गलेप्रभातकालेचनृपाभिषेचने व्यासेनसम्पूर्णमनोरथाष्टकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्वन्तुवःपूर्णमनोरथंसदा ९ इतिअभिषेकः ✓ अथतिलकमंत्रदानम् स्व-
स्तिनःइन्द्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाःस्वस्तिनस्तार्क्ष्योअरिष्टनेमिः स्वस्ति
नोबृहस्पतिर्दधातु ✓ १ मंत्रार्थाःसफलाःसंतुपूर्णाःसंतुमनोरथाःशत्रूणांबुद्धिनाशो
स्तुमित्राणामुदयोस्तुवः २ ✓ अथाग्निप्रार्थनाविसर्जनंच गच्छत्वंभगवन्नग्ने
स्वस्थानेकुंडमध्यतः हुतमादायदेवेभ्यः शीघ्रंदेहिप्रसीदमे १ ॐ गच्छगच्छ
सुरश्रेष्ठस्वस्थानेपरमेश्वरयत्रब्रह्मादयोदेवास्तत्रगच्छहुताशन २ अथनवग्र-
हादिविसर्जयेत् अक्षतानादाय भूमिमध्येगच्छसिद्धगोलोके त्वंप्रजापते
वरुणत्वंजलेगच्छसागरेकलशद्भव १ ✓ होमांतेगच्छगणपब्रह्मांडे त्वं
पितामह विष्णोत्वंगच्छवैकुंठे कैलासेचमहेश्वर २ लक्ष्मित्वंविष्णुपार्श्वेतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वभर्त्तारमनुव्रज २वेगच्छकलिंगेत्वंचंद्रत्वंयमुनातटे ३ अवंतींगच्छभौम-
त्वं बुधेत्वंमगधेव्रज जीवव्रजसिंधुदेशेकवेभोजकटेव्रज ४ शनेत्वंगच्छसौराष्ट्रे
राहोरादीनकंव्रज केतोंत वैंदीगच्छत्वंस्वंस्वंस्थानंनवग्रहाः ५ इंद्रामरावतींग-
च्छतथाग्नेर्यांचपावक सयमिनींव्रजयमनैर्ऋतींव्रजनिर्ऋते ६ वरुणांभोनिधौग-
च्छ सर्वत्रव्रजमारुत कुबेरालकांगच्छत्वमीशेशानींदिशंव्रज ७ महेंद्रेत्वंव्रजांग-
स्त्यध्रुवत्वंमेरुपर्वते तथाभवद्भिर्ऋषयोगंतव्यमृषिमंडले ८ वसवोष्टौतुगं
गायां रुद्ररुद्रपुरींव्रज गंधर्वाःकिन्नराःसर्वेस्वंस्वंस्थानंचगच्छथ ९ यातु
देवगणाःसर्वेपूजामादायमामकीं इष्टकामप्रसिद्ध्यर्थंपुनरागमनायच १०
रूपंदेहिजयंदेहियशोदेहिद्विषोजहि पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११ चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच हूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसी
दतु १२ यस्यस्मृत्याचनामोक्त्यातपःपूजाक्रियादिषु न्यूनंसंपूर्णतां-
यातिसद्योवंदेतमच्युतं१३ ततोब्राह्मणान्भोजयित्वाकुटुंबजनैःपरिवृतो
स्वयंभोजनंकुर्यात् इतिवसिष्ठोक्ताहवनपद्धतिः समाप्ता ॥ ॥
श्रीकृष्णार्पणमस्तु श्रीसांबसदाशिवार्पणमस्तु शुभंभवतु श्रीरस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदंपुस्तकं भगीरथात्मज हरिप्रसादेन मोहमय्यां जगदीश्वराख्य-
शिलायंत्रालयेमुद्रितंशकाब्दा१८०५संवत् १९४०

यहपुस्तक कालकादेवीकेरस्तेपर रामवाडीकेपास हरिप्रसाद भगी
रथजीकेपुस्तकालयमे मिलेगा.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११ चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच हूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसी
दतु १२ यस्यस्मृत्याचनामोक्त्यातपःपूजाक्रियादिषु न्यूनंसंपूर्णतां-
यातिसद्योवंदेतमच्युतं१३ ततोब्राह्मणान्भोजयित्वाकुटुंबजनैःपरिवृतो
स्वयंभोजनंकुर्यात् इतिवसिष्ठोक्ताहवनपद्धतिः समाप्ता ॥ ॥
श्रीकृष्णार्पणमस्तु श्रीसांबसदाशिवार्पणमस्तु शुभंभवतु श्रीरस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति वासिष्ठीहवनपद्धतिः समाप्ता.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=09.07.20 11:44
,TRANSFERRED=2020/07/09 at 12:01:56
,PAGES=81
,TYPE=STD
,NAME=S0003280
,Book Name=M-390-VASHISHT HAVAN PADHHATI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection